**A** **721**

# वार्षिकमूल्यनिर्णयः 2017 -18

## संस्कृतम्

## SANSKRIT

(For Sanskrit Schools Only)

**कक्ष्या - सप्तमी**
**Std. VII**

**समयः - होराद्वयम्**
**Time – 2 Hrs**

---

നിർദ്ദേശങ്ങൾ :
- ഉത്തരം എഴുതുന്നതിന് മുമ്പായി 15 മിനിട്ട് സമാശ്വാസസമയമാണ്
- അഞ്ച് ചോദ്യങ്ങൾക്ക് ഉത്തരം എഴുതിയാൽ മതി.
- ഉത്തരം എഴുതുന്നതിന് ദേവനാഗരി ലിപി ഉപയോഗിക്കണം.

निर्देशाः -
- उत्तरलेखनात् पूर्वं छात्राणां कृते समाश्वासरूपेण १५ निमेषाः देयाः।
- पञ्च प्रश्नाः समाधेयाः।
- उत्तरलेखनाय देवनागरीलिपिः उपयोक्तव्या।

---

**प्रवर्तनम्-१**

**यथोचितं योजयत।**

१. योगदर्शनम् - कपिलमुनिः।
२. पूर्वमीमांसा - गौतमः
३. न्यायदर्शनम् - जैमिनिमहर्षिः।
४. सांख्यदर्शनम् - बृहस्पतिः।
५. चार्वाकदर्शनम् - पतञ्जलिमहर्षिः।

**प्रवर्तनम् २**

**क). कोष्ठकात् उचितानि पदानि चित्वा कारिकां पूरयत ।**

( करी , द्विपः , नागः , हस्ती )

दन्ती दन्तावलो..... ............द्विरदोऽनेकपो.........................।
मतङ्गजो गजो..............कुञ्जरो वारणः.....................।।

ख). अमरकोशस्य अपरं नाम किम्?

**प्रवर्तनम्-३**

**सूचनानुसारं जीवनचरितं लिखत।**

**सूचनाः :-**

| | | |
|---|---|---|
| नाम | - | रवीन्द्रनाथठाक्कूरः । |
| पितरौ | - | देवेन्द्रनाथठाक्कूरः , शारदादेवी च । |
| जन्म | - | १८६१ तमे क्रिस्त्वब्दे वङ्गदेशे कालीघट्टे । |
| कृतिः | - | गीताञ्जलिः । |
| पुरस्कारः | - | नोबेल् । |
| दिवङ्गतः | - | १९४१ तमे क्रिस्त्वब्दे । |

**प्रवर्तनम् - ४**

**'सुमेरोः विष्णुसादृश्यम् अस्ति' इत्याशयप्रतिपादकं श्लोकं चित्वा लिखत।**

/ दरीगृहोत्सङ्गगतेरनूरोः
कशाभिघातध्वनिभिः सकम्पाः।
सद्यः प्रियानुज्झितमानदोषाः
सुराङ्गना यत्र परिष्वजन्ते ।।

श्रियाभिरामः शरणं सुराणा-
मलङ्घनीयो महता महिम्ना ।
विराजमानो वनमालया च
यच्छाङर्गधन्वानुप्रयाति ।।

**प्रवर्तनम् ५**

**खण्डिकां पठित्वा प्रशनानाम् उत्तराणि लिखत ।**

दृश्यते साक्षात्क्रियते प्रपञ्चोत्पत्तिस्थितिलयादिकम् अनेन इति दर्शनम्। भारतीयरीत्या आस्तिकं नास्तिकं चेति दर्शनानि द्विधा विभक्तानि। अवैदिकानि नास्तिकदर्शनानि चार्वाकम्, बौद्धम्, जैनं चेति त्रिधा भवन्ति। तेषु अतिप्राचीनतमं भवति चार्वाकदर्शनम् । जीवनकाले सदा सुखमस्तु, ऋणं कृत्वापि घृतम् पिबतु इति तेषां विश्वासः। अहिंसासिद्धान्ते अधिष्ठितं भवति गौतमबुद्धस्य बौद्धदर्शनम्।

१) दर्शनम् इत्यनेन किम् उद्दिश्यते ?

२) नास्तिकदर्शनानि कति ?

३) अतिप्राचीनतमं नास्तिकदर्शनं किम् ?

४) बौद्धदर्शनस्य सिद्धान्तः कः?

५) भौतिकविषये चार्वाकानां मतं किम् ?

**प्रवर्तनम् - ६**

**उदाहरणानुसारं लिखत।**

**उदा :-** मेघः वर्षति। छत्रं उद्घाटयति।

यदा मेघः वर्षति तदा छत्रम् उद्घाटयति।

१) मार्जारः आगच्छति। मूषकः धावति।

**उदा :-** रामलक्ष्मणौ विश्वामित्रेण साकं वनम् अगच्छताम् ।

२) दिलीपः **पुत्रः** साकं ग्रन्थशालाम् आगच्छत् ।

**उदा :-** **ग्रामं** परितः नद्यः सन्ति ।

३) **गृहस्य** परितः उद्यानम् अस्ति ।

**उदा :-** समादृतः + अयम् = समादृतोऽयम् ।

४) ............... + ................ = विख्यातोऽयम् ।

**उदा :-** संस्कृतं जानाति इति - संस्कृतज्ञः ।

५) ...................................... - संगीतज्ञः ।

## प्रवर्तनम् - ७

**निर्देशानुसारं पदप्रश्नं पूरयत।**

**दक्षिणतः :-**

१. काननम् इत्यर्थकं पदम्।
२. गजस्य अपरं नाम।

**अधः :-**

१. सप्तर्षिषु एकः।
२. पारन्ती —— भवति।
३. हस्तः इत्यर्थकं पदम्।

| | | | |
|---|---|---|---|
| 1 | नम् | ■ | 3 |
| | 2 कु | | रः |
| ष्ठः | | ■ | ■ |
| ■ | मम् | ■ | ■ |